# Yogaraja Upanishad

# યોગરાજોપનિષત્

## Document Information

Text title : yogarAjopaniShat

File name : yogarAjopaniShat.itx

Category : upanishhat, yoga, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 20, 2020

*sanskritdocuments.org*

# યોગરાજોપનિષત્

યોગરાજં પ્રવક્ષ્યામિ યોગિનાં યોગસિદ્ધયે ।
મન્ત્રયોગો લયશ્ચૈવ રાજયોગો હઠસ્તથા ॥ ૧॥

યોગશ્ચતુર્વિધઃ પ્રોક્તો યોગિભિસ્તત્ત્વદર્શિભિઃ ।
આસનં પ્રાણસંરોધો ધ્યાનં ચૈવ સમાધિકઃ ॥ ૨॥

એતચ્ચતુષ્ટયં વિદ્ધિ સર્વયોગેષુ સમ્મતમ્ ।
બ્રહ્મીવિષ્ણુશિવાદીનાં મન્ત્રં જાપ્યં વિશારદૈઃ ॥ ૩॥

સાધ્યતે મન્ત્રયોગસ્તુ વત્સરાજાદિભિર્યથા ।
કૃષ્ણદ્વૈપાયનાદ્યૈસ્તુ સાધિતો લયસંજ્ઞિતઃ ॥ ૪॥

નવસ્વેવ હિ ચક્રેષુ લયં કૃત્વા મહાત્મભિઃ ।
પ્રથમં બ્રહ્મચક્રં સ્યાત્ ત્રિરાવૃત્તં ભગાકૃતિ ॥ ૫॥

અપાને મૂલકન્દાખ્યં કામરૂપં ચ તજ્જગુઃ ।
તદેવ વહ્નિકુણ્ડં સ્યાત્ તત્ત્વકુણ્ડલિની તથા ॥ ૬॥

તાં જીવરૂપિણીં ધ્યાયેજ્જ્યોતિષ્ઠં મુક્તિહેતવે ।
સ્વાધિષ્ઠાનં દ્વિતીયં સ્યાચ્ચક્રં તન્મધ્યગં વિદુઃ ॥ ૭॥

પશ્ચિમાભિમુખં લિઙ્ગં પ્રવાલાઙ્કુરસન્નિભમ્ ।
તત્રોડ્રીયાણપીઠેષુ તં ધ્યાત્વાકર્ષયેજ્જગત્ ॥ ૮॥

તૃતીયં નાભિચક્રં સ્યાત્તન્મધ્યે તુ જગત્ સ્થિતમ્ ।
પઞ્ચાવર્તાં મધ્યશક્તિં ચિન્તયેદ્વિદ્યુદાકૃતિ ॥ ૯॥

તાં ધ્યાત્વા સર્વસિદ્ધીનાં ભાજનં જાયતે બુધઃ ।
ચતુર્થં હૃદયે ચક્રં વિજ્ઞેયં તદધોમુખમ્ ॥ ૧૦॥

જ્યોતીરૂપં ચ તન્મધ્યે હંસં ધ્યાયેત્ પ્રયત્નતઃ ।
તં ધ્યાયતો જગત્ સર્વં વશ્યં સ્યાન્નાત્ર સંશયઃ ॥ ૧૧॥

પઞ્ચમં કણ્ઠચક્રં સ્યાત્ તત્ર વામે ઇડા ભવેત્ ।
દક્ષિણે પિઙ્ગલા જ્ઞેયા સુષુમ્ના મધ્યતઃ સ્થતા ॥ ૧૨॥

તત્ર ધ્યાત્વા શુચિ જ્યોતિઃ સિદ્ધીનાં ભાજનં ભવેત્ ।
ષષ્ઠં ચ તાલુકાચક્રં ઘણ્ટિકાસ્થાનમુચ્યતે ॥ ૧૩॥

દશમદ્વારમાર્ગં તદ્રાજદન્તં ચ તજ્જગુઃ ।
તત્ર શૂન્યે લયં કૃત્વા મુક્તો ભવતિ નિશ્ચિતમ્ ॥ ૧૪॥

ભ્રૂચક્રં સપ્તમં વિદ્યાદ્બિન્દુસ્થાનં ચ તદ્વિદુઃ ।
ભ્રુવોર્મધ્યે વર્તુલં ચ ધ્યાત્વા જ્યોતિઃ પ્રમુચ્યતે ॥ ૧૫॥

અષ્ટમં બ્રહ્મરન્ધ્રં સ્યાત્ પરં નિર્વાણસૂચકમ્ ।
તં ધ્યાત્વા સૂતિકાગ્રામં ધૂમાકારં વિમુચ્યતે ॥ ૧૬॥

તચ્ચ જાલન્ધરં જ્ઞેયં મોક્ષદં નીલચેતસમ્ ।
નવમં વ્યોમચક્રં સ્યાદશ્રૈઃ ષોડશભિર્યુતમ્ ॥ ૧૭॥

સંવિદ્ભ્રૂયાચ્ચ તન્મધ્યે શક્તિરુદ્ધા સ્થિતા પરા ।
તત્ર પૂર્ણાં ગિરૌ પીઠે શક્તિં ધ્યાત્વા વિમુચ્યતે ॥ ૧૮॥

એતેષાં નવચક્રાણામેકૈકં ધ્યાયતો મુનેઃ ।
સિદ્ધયો મુક્તિસહિતાઃ કરસ્થાઃ સ્યુર્દિને દિને ॥ ૧૯॥

એકો દણ્ડદ્વયં મધ્યે પશ્યતિ જ્ઞાનચક્ષુષા ।
કદમ્બગોલકાકારં બ્રહ્મલોકં વ્રજન્તિ તે ॥ ૨૦॥

ઊર્ધ્વશક્તિનિપાતેન અધઃશક્તેર્નિકુઞ્ચનાત્ ।
મધ્યશક્તિપ્રબોધેન જાયતે પરમં સુખં જાયતે પરમં સુખમ્ । ઇતિ ॥ ૨૧॥

(યોગ-ઉપનિષદઃ)

ઇતિ યોગરાજોપનિષત્ સમાપ્તા ।

Proofread by Kasturi navya sahiti

*Yogaraja Upanishad*

pdf was typeset on March 20, 2020

Please send corrections to *sanskrit@cheerful.com*